# શ્રીમીનાક્ષ્યષ્ટકમ્

Shri Minakshi Ashtakam

sanskritdocuments.org

November 19, 2018

# Shri Minakshi Ashtakam

# શ્રીમીનાક્ષ્યષ્ટકમ્

## Sanskrit Document Information

Text title : Minakshi Ashtakam

File name : mInAkShyaShTakam.itx

Category : devii, aShTaka

Location : doc_devii

Author : Rajapujitha Sri Kulandayananda Swamigal

Transliterated by : G. Vasanth gsathyaarumugam at gmail.com

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Latest update : November 19, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 19, 2018

*sanskritdocuments.org*

# શ્રીમીનાક્ષ્યષ્ટકમ્

શ્રીમીનાક્ષ્યષ્ટકમ્ ॥

માધુર્યે મહિમે મહાગિરિસુતે મલ્લાદિ સંહારિણિ
મૂલાધારકૃતે મહામરકતે શોભે મહાસુન્દરિ ।
માતઙ્ગિ મહિમે મહાસુરવધે મન્ત્રોત્તમે માધવિ
મીનાક્ષિ મધુરામ્બિકે મહિમયે માં પાહિ મીનામ્બિકે ॥ ૧॥

નાનારત્નવિભૂષણે નવગણે શોભે મહાસુન્તરિ
નિત્યાનન્દવરે નિરૂપણગુણે નિમ્નોન્નતે પઙ્કજે ।
નાટ્યે નાટકવેષધારિણિ શિવે નાદે કાલનર્તકિ(?)
મીનાક્ષિ મધુરામ્બિકે મહિમયે માં પાહિ મીનામ્બિકે ॥ ૨॥

કામક્રોધનિવારણે કરુણાલયે કાત્યાયનિ સન્મતે
કારુણ્યાકૃતિકે કિરાતવરદે કં ગં ક બીજાઙ્કુરે ।
કામાર્થં તવ સિદ્ધિહેતુકમિદં ભક્ત્યા ભવત્સન્નિધૌ
મીનાક્ષિ મધુરામ્બિકે મહિમયે માં પાહિ મીનામ્બિકે ॥ ૩॥

ષટ્ચક્રાન્તગતે ષડાનનવરે ષડ્બીજરક્ષાઙ્કુરે
ષોડાધારકલે ષડક્ષરિ શિવે ક્ષોણી મહાક્ષીયતે ।
ક્ષન્તવ્યં જનનિ ક્ષમા રમ શિવે ક્ષીરાબ્ધિ મધ્યાન્તરે
મીનાક્ષિ મધુરામ્બિકે મહિમયે માં પાહિ મીનામ્બિકે ॥ ૪॥

વામે નીલદલાક્ષિ પુષ્પરસિકે બાલે મહાકુઙ્કુમે
અન્યે પાણિવરાબ્જભક્તજનનિ નિત્યં પરશ્રેયસિ ।
બાલે બન્ધુવરાઙ્ગિણિ બહુવિધે ભૂચક્રસઞ્ચારિણિ
મીનાક્ષિ મધુરામ્બિકે મહિમયે માં પાહિ મીનામ્બિકે ॥ ૫॥

રાગસ્તોત્રવિચારવેદવિભવે રમ્યે રતોલ્લાસિનિ
રાજીવેક્ષણિ રાજ રાઙ્ગણરણે રાજાધિરાજેશ્વરિ ।

રાજ્ઞિ રાજસસત્ત્વતામસગુણે રાધે રમાસોદરિ
મીનાક્ષિ મધુરામ્બિકે મહિમયે માં પાહિ મીનામ્બિકે ॥ ૬॥

સારાસ્યે સરસીરુહસ્ય જનનિ સામ્રાજ્યદાનેક્ષણિ
સામ્યાસામ્ય ચાષ્ટકલાસુખવને સાન્દીપનીસેવિતે ।
સત્યાનન્દસુધે ચ સુન્દરફલે સ્વાધિષ્ઠચક્રાન્તરે
મીનાક્ષિ મધુરામ્બિકે મહિમયે માં પાહિ મીનામ્બિકે ॥ ૭॥

કર્પૂરારુણકુઙ્કુમાર્ચિતપદે ક્ષીરાબ્ધિશોભે શિવે
ગાયત્રિ કરુણાકટાક્ષવિનુતે કન્દર્પકાન્તિપ્રદે ।
કલ્યાણાષ્ટસુરાર્ચિતે સુકવિતે કારુણ્યવારાન્નિધે
મીનાક્ષિ મધુરામ્બિકે મહિમયે માં પાહિ મીનામ્બિકે ॥ ૮॥

ઇતિ રાજપૂજિત શ્રીકુલન્તયાનન્દ(બાલાનન્દ)સ્વામિના વિરચિતં
શ્રીમીનાક્ષ્યષ્ટકં સમ્પૂર્ણમ્ ।

Encoded by G. Vasanth gsathyaarumugam at gmail.com
Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Minakshi Ashtakam*
pdf was typeset on November 19, 2018

Please send corrections to *sanskrit@cheerful.com*